# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीयपरीक्षा - प्रथमपत्रिका

दिनाङ्कः - २६.०८.२०१८ | पूर्वाह्णः १०.०० तः १.०० पर्यन्तम्

समयः - होरात्रयम् | अङ्काः -१००

1. पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत । 5

    १. गणेशं के कदा नमस्कुर्वन्ति ?

    २. बालिकायाः हस्ते किमासीत् ?

    ३. विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?

    ४. रामशुकः कुत्र न्यवसत् ?

    ५. वृक्षस्योपरि का स्थिता ?

    ६. के जयन्ति ?

    ७. साधवः किं न विस्मरन्ति ?

    ८. मल्लस्य नाम किम् ?

2. षण्णां द्वित्रैः वाक्यैः संस्कृतेन उत्तरं लिखत । 12

    १. विष्णुशर्मणः प्रतिज्ञा का ?

    २. सीता कुत्र कथम् अवर्तत ?

    ३. शुकशावकयोः नाम किम् ? शावकौ काभ्यां व्यक्रीणात् ?

    ४. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?

    ५. पितामहः आत्मानं कथं दर्शितवान् ?

    ६. पर्वतं वोढुं सिद्धः मल्लः राजानं किमवदत् ?

    ७. दृप्तः कपोतः अन्यान् कपोतान् किमाह ?

    ८. सर्वलोकैकनाथः कः ? तस्य आकारः कीदृशः ?

3. त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत । 9

१. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

२. अमरशक्तेः अमात्येषु एकस्य अभिप्रायः कः ?

३. राक्षसाः के ?

४. कौशिकः गृहिणीं क्रुद्धया दृष्ट्या पश्यन् किमाह ?

4. चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत । 12

१. " पतिव्रतायाः माहात्म्यम् " अस्य पाठस्य सारांशं लिखत ।

२. " ब्रह्मस्तवः" अस्य पद्यांशस्य सारांशं लिखत।

३. विक्रमस्य चरितं कथं लोकोत्तरमासीत् ? विशदयत।

४. एकलव्यस्य गुरुभक्तिं विवृणुत ।

५. श्रीमच्छंकराचार्यैः सनातनधर्मस्य रक्षणं कथं कृतम् ? विवृणुत।

5. चतुर्णां ससन्दर्भं मातृभाषया विवृणुत । 12

१. " अस्ति विष्णुशर्मा नाम भूसुरः"

२. " अये विप्र ! आवां यमलौ भ्रातरौ "

३. " नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता"

४. " राजन् ! पूरिता मया समस्या "

५. " रणे रावणं हत्वा त्वां नेष्यति"

6. द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत । 4

१. स गत्वा वानरैः साकं राघवायात्मना कृतम्।
निवेदयित्वा सकलं ददौ चूडामणिं च तम्॥

२. एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत्॥

३. अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

7. श्लोकद्वयं पूरयत । 4

१. आद्याय ------------ शम्भवे । ३. विद्यया--------- राक्षसाः।

२. प्रथमवयसि -------- विस्मरन्ति।

8. गद्यस्य अस्य अनुवादं कुरुत । 4

एकदा द्रोणस्याज्ञया कौरवपाण्डवाः मृगयां कर्तुं वनमगच्छन्। तेषु मृगयां कुर्वत्सु कश्चित् सारमेयः अपरिचितमेकलव्यं दृष्ट्वा अभषत्। अनुपदमेव स भषतश्शुनो मुखे सप्तशरानपूरयत्। स श्वा शरपूर्णास्यः अर्जुनसमीपमागच्छत्। स तु तं विलोक्य विस्मितः अभवत्।

9. रिक्तस्थानानि पूरयत । 4

१. शङ्करस्य माता च धर्मशीला सती ---------- । ३. अतिथिसत्कारः ------------ ।

२. मनुष्याणां क्रोधः-------------------- रिपुः। ४. हस्ते किं ते ---------------।

10. त्रयाणां पर्यायपदानि लिखत । 3

१. वायसः २. मही ३. भूसुरः ४. आननम्

11. त्रयाणां विरुद्धपदानि लिखत । 3

१. दिवा २. व्यक्तः ३. उपक्रम: ४. आद्याय

12. वाक्यदोषं परिहरत । 3

१. सः मित्रे असूयति। २. रामः आम्रफलं स्पृहयति।

२. सीतायाः समं रामः गच्छति।

13. त्रीणि पदानि संस्कृतवाक्येषु योजयत । 3

१. क्षीयते २. श्रुत्वा ३. तुल्यम् ४. सम्यक्

14. एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत । 3

१. ददातु    २. अब्रवीत्    ३. लभताम्

15. सन्धिं विभज्य सन्धिनाम लिखत । 3

१. जगद्गुरुः    २. तैरुक्तम्    ३. उभावपि

16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत (द्वे एव)। 4

१. क्लेशः --------- विधत्ते।    ३. संभावितस्य ------------ अतिरिच्यते।

२. उद्योगिनं ----------- लक्ष्मीः।

17. संयोजय लिखत । 4

| अ | आ |
|---|---|
| १. अधीत्य | वर्तमानकृदन्तः |
| २. अनुपदम् | ल्यबन्ताव्ययम् |
| ३. अवातरत् | अव्ययम् |
| ४. गवेषयमाणः | तिङन्तम् |

18. व्याकरणविशेषं लिखत। 2

१. गच्छतु भवान्    २. महराजः।

19. रेखाङ्किपदमाधृत्य प्रश्नवाक्यं रचयत । 2

१. <u>प्रातःकाले</u> पक्षिणः कूजन्ति।    २. अमरशक्तेः <u>त्रयः</u> पुत्राः आसन्।

20. समूहेतरपदं पृथक् कृत्वा लिखत। 2

१. रामाय, विहाय, गोविन्दाय, केशवाय    २. मार्गस्य, विद्यालयस्य, आपणस्य, विहस्य

21. प्रयोगं परिवर्तयत। 2

१. मया सः पाठितः।    २. सा देवालयं गच्छति।

---------------

श्रीसुरसरस्वतीसभा, शृङ्गेरी

तृतीयपरीक्षा - द्वितीयपत्रिका

दिनाङ्कः - २६.०८.२०१८ | अपराह्णः १.३०तः ३.०० पर्यन्तम्

समयः - सार्धैकहोरा | अङ्काः ५०

1. एकं विषयमधिकृत्य दशभिः वाक्यैः संस्कृतभाषायां प्रबन्धमेकं लिखत। 5

१. गजः　　२. पुस्तकालयः　　३. सूर्यचन्द्रौ

2. एकं विषयमधिकृत्य संस्कृतभाषायां पत्रमेकं लिखत। 5

१. शालायाः क्रीडोत्सवं वर्णयन् मित्रं प्रति पत्रम्।

२. भगिन्याः विवाहार्थं विरामं प्रार्थयन् अध्यापकाय पत्रम्।

3. द्वयोः लक्षणं सोदाहरणं मातृभाषया लिखत। 6

१. उपसर्गः　　२. क्त्वा-ल्यप्-प्रत्ययौ　　३. विशेषणम्

4. वाक्यदोषान् समीकुरुत। 4

१. रजतं स्वर्णाय भिन्नम्।　　३. वयं देवालयं गच्छन्ति।

२. फलानि वृक्षं पतति।　　४. बालकः जनन्याः सार्धम् अगच्छत्।

5. द्वयोः रूपाणि सर्वपुरुषवचनेषु लिखत। 6

१. लभेत　　२. अददात्　　३. करोतु

6. संस्कृतवाक्ये योजयत। 4

१. छात्रेभ्यः　　२. पठितुम्　　३. चतस्रः　　४. उपविश्य

7. सर्वविभक्तिवचनेषु लिखत। (एकमेव) 4

१. अस्मद्　　२. गुरुः　　३. विद्वस्

8. वाक्यमेकं मातृभाषया विवृणुत। 2

१. धैर्यं सर्वत्र साधनम्। २. नास्ति उद्यमसमो बन्धुः

9. स्त्रीलिङ्गरूपं लिखत (द्वयोः एव) 2

१. त्रयः २. गीतवान् ३. एषु

10. एकस्य व्याकरणविशेषं लिखत। 2

१. धनिकाय असूयति २. शर्करां परितः

11. मातृभाषया अनुवदत 5

१. बालकाः पाठान् पठित्वा अक्रीडन्। ४. महिलाः पुष्पैः मालाः अरचयन्।

२. मार्गाः दीर्घाः सन्ति। ५. वयं श्रद्धया कार्यं कुर्मः।

३. कवयः वृक्षात् वृक्षं प्लवन्ते।

12. संस्कृतभाषायाम् अनुवदत 5

1) ಡಬ್ಬದಲ್ಲಿ ಎಷ್ಟು ಲೇಖನಿಗಳಿವೆ ? How many pens are there in the box.

2) ರಾಜನು ಬೇಟೆಗೆ ಕಾಡಿಗೆ ಹೋದನು.The king went to the forest for hunting.

3) ಯಾತ್ರಿಕರು ನದಿಯಲ್ಲಿ ಸ್ನಾನವನ್ನು ಮಾಡಿ ದೇವಾಲಯವನ್ನು ಪ್ರವೇಶಿಸಿದರು.

The pilgrims entered the temple after taking bath in the river.

4) ವ್ಯಾಸಮಹರ್ಷಿಗಳು ಮಹಾಭಾರತವನ್ನು ಬರೆದರು.

Vyasa Maharshi wrote Mahabharata.

5) ಅಧ್ಯಾಪಕರು ಕಪ್ಪುಹಲಗೆಯ ಮೇಲೆ ಬರೆದರು.

The teacher wrote on the black board.

--------------